# Shri Krishnastutihbrahma

# શ્રીકૃષ્ણસ્તુતિઃબ્રહ્મ

## Document Information

Text title : kRRiShNastutiH brahma

File name : kRRiShNastutiHbrahma.itx

Category : vishhnu, krishna

Location : doc_vishhnu

Proofread by : PSA Easwaran psawaswaran at gmail.com

Description/comments : Edited by S. V. Radhakrishna Shastriji

Acknowledge-Permission: Mahaperiaval Trust

Latest update : May 13, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# Shri Krishnastutihbrahma

# શ્રીકૃષ્ણસ્તુતિઃબ્રહ્મ

બ્રહ્મકૃતા
નૌમીડ્ય તેઽભ્રવપુષે તડિદમ્બરાય
ગુઞ્જાવતંસપરિપિચ્છલસન્મુખાય ।
વન્યસ્રજે કવલવેત્રવિષાણવેણુ-
લક્ષ્મશ્રિયે મૃદુપદે પશુપાઙ્ગજાય ॥ ૧॥

અસ્યાપિ દેવ વપુષો મદનુગ્રહસ્ય
સ્વેચ્છામયસ્ય ન તુ ભૂતમયસ્ય કોઽપિ ।
નેશેમહિ ત્વવસિતું મનસાન્તરેણ
સાક્ષાત્તવૈવ કિમુતાત્મસુખાનુભૂતેઃ ॥ ૨॥

જ્ઞાને પ્રયાસમુદપાસ્ય નમન્ત એવ
જીવન્તિ સન્મુખરિતાં ભવદીયવાર્તામ્ ।
સ્થાને સ્થિતાઃ શ્રુતિગતાં તનુવાઙ્મનોભિઃ
યે પ્રાયશોઽજિત જિતોઽપ્યસિ તૈસ્ત્રિલોક્યામ્ ॥ ૩॥

શ્રેયઃસ્રુતિં ભક્તિમુદસ્ય તે વિભો ક્લિશ્યન્તિ યે કેવલબોધલબ્ધયે ।
તેષામસૌ ક્લેશલ એવ શિષ્યતે નાન્યદ્યથા સ્થૂલતુષાવઘાતિનામ્ ॥ ૪॥

પુરેહ ભૂમન્ બહવોઽપિ યોગિનસ્ત્વદર્પિતેહા નિજકર્મલબ્ધયા ।
વિબુધ્ય ભક્ત્યૈવ કથોપનીતયા પ્રપેદિરેઽઞ્જોઽચ્યુત તે ગતિં પરામ્ ॥ ૫॥

તથાપિ ભૂમન્ મહિમાઽગુણસ્ય તે વિબોદ્ધુમર્હત્યમલાન્તરાત્મભિઃ ।
અવિક્રિયાત્સ્વાનુભવાદરૂપતો હ્યનન્યબોધ્યાત્મતયા ન ચાન્યથા ॥ ૬॥

ગુણાત્મનસ્તેઽપિ ગુણાન્ વિમાતું હિતાવતીર્ણસ્ય ક ઈશિરેઽસ્ય ।
કાલેન યૈર્વા વિમિતાઃ સુકલ્પૈર્ભૂપાંસવઃ ખે મિહિકા દ્યુભાસઃ ॥ ૭॥

તત્તેઽનુકમ્પાં સુસમીક્ષમાણો ભુઞ્જાન એવાત્મકૃતં વિપાકમ્ ।
હૃદ્વાગ્વપુર્ભિર્વિદધન્નમસ્તે જીવેત યો મુક્તિપદે સ દાયભાક્ ॥ ૮॥

પશ્યેશ મેઽનાર્યમનન્ત આદ્યે પરાત્મનિ ત્વય્યપિ માયિમાયિનિ ।
માયાં વિતત્યેક્ષિતુમાત્મવૈભવં હ્યહં કિયાનૈચ્છમિવાર્ચિરગ્નૌ ॥ ૯॥

અતઃ ક્ષમસ્વાચ્યુત મે રજોભુવો હ્યજાનતસ્ત્વત્પૃથગીશમાનિનઃ ।
અજાવલેપાન્ધતમોઽન્ધચક્ષુષ એષોઽનુકમ્પ્યો મયિ નાથવાનિતિ ॥ ૧૦॥

ક્વાહં તમોમહદહઙ્ખચરાગ્નિવાર્ભૂસંવેષ્ટિતાણ્ડઘટસપ્તવિતસ્તકાયઃ ।
ક્વેદૃગ્વિધાવિગણિતાણ્ડપરાણુચર્યાવાતાધ્વરોમવિવરસ્ય ચ તે મહિત્વમ્ ॥ ૧૧॥

ઉત્ક્ષેપણં ગર્ભગતસ્ય પાદયોઃ કિં કલ્પતે માતુરધોઽક્ષજાગસે ।
કિમસ્તિ નાસ્તિવ્યપદેશભૂષિતં તવાસ્તિ કુક્ષેઃ કિયદપ્યનન્તઃ ॥ ૧૨॥

જગત્ત્રયાન્તોદધિસમ્પ્લવોદે નારાયણસ્યોદરનાભિનાલાત્ ।
વિનિર્ગતોઽજસ્ત્વિવતિ વાઙ્ન વૈ મૃષા કિં ત્વીશ્વરત્વાન્ન વિનિર્ગતોઽસ્મિ ॥

નારાયણસ્ત્વં ન હિ સર્વદેહિનામાત્માસ્યધીશાખિલલોકસાક્ષી ।
નારાયણોઽઙ્ગં નરભૂજલાયનાત્તચ્ચાપિ સત્યં ન તવૈવ માયા ॥ ૧૪॥

તચ્ચેજ્જલસ્થં તવ સજ્જગદ્વપુઃ કિં મે ન દૃષ્ટં ભગવંસ્તદૈવ ।
કિં વા સુદૃષ્ટં હૃદિ મે તદૈવ કિં નો સપદ્યેવ પુનર્વ્યદર્શિ ॥ ૧૫॥

અત્રૈવ માયાદમનાવતારે હ્યસ્ય પ્રપઞ્ચસ્ય બહિઃ સ્ફુટસ્ય ।
કૃત્સ્નસ્ય ચાન્તર્જઠરે જનન્યા માયાત્વમેવ પ્રકટીકૃતં તે ॥ ૧૬॥

યસ્ય કુક્ષાવિદં સર્વં સાત્મં ભાતિ યથા તથા ।
તત્ત્વય્યપીહ તત્સર્વં કિમિદં માયયા વિના ॥ ૧૭॥

અદ્યૈવ ત્વદૃતેઽસ્ય કિં મમ ન તે માયાત્વમાદર્શિતં
એકોઽસિ પ્રથમં તતો વ્રજસુહૃદ્વત્સાઃ સમસ્તા અપિ ।
તાવન્તોઽસિ ચતુર્ભુજાસ્તદખિલૈઃ સાકં મયોપાસિતા-
સ્તાવન્ત્યેવ જગન્ત્યભૂસ્તદમિતં બ્રહ્માદ્વયં શિષ્યતે ॥ ૧૮॥

અજાનતાં ત્વત્પદવીમનાત્મન્યાત્માઽઽત્મના ભાસિ વિતત્ય માયામ્ ।
સૃષ્ટાવિવાહં જગતો વિધાન ઇવ ત્વમેષોઽન્ત ઇવ ત્રિનેત્રઃ ॥ ૧૯॥

સુરેષ્વૃષિષ્વીશ તથૈવ નૃષ્વપિ તિર્યક્ષુ યાદઃસ્વપિ તેઽજનસ્ય ।
જન્માસતાં દુર્મદનિગ્રહાય પ્રભો વિધાતઃ સદનુગ્રહાય ચ ॥ ૨૦॥

કો વેત્તિ ભૂમન્ ભગવન્ પરાત્મન્ યોગેશ્વરોતીર્ભવતસ્ત્રિલોક્યામ્ ।
ક્વ વા કથં વા કતિ વા કદેતિ વિસ્તારયન્ ક્રીડસિ યોગમાયામ્ ॥ ૨૧॥

તસ્માદિદં જગદશેષમસત્સ્વરૂપં સ્વપ્નાભમસ્તધિષણં પુરુદુઃખદુઃખમ્ ।
ત્વય્યેવ નિત્યસુખબોધતનાવનન્તે માયાત ઉદ્યદપિ યત્સદિવાવભાતિ ॥ ૨૨॥

એકસ્ત્વમાત્મા પુરુષઃ પુરાણઃ સત્યઃ સ્વયઞ્જ્યોતિરનન્ત આદ્યઃ ।
નિત્યોઽક્ષરોઽજસ્રસુખો નિરઞ્જનઃ પૂર્ણોઽદ્વયો મુક્ત ઉપાધિતોઽમૃતઃ ॥ ૨૩॥

એવંવિધં ત્વાં સકલાત્મનામપિ સ્વાત્માનમાત્માઽઽત્મતયા વિચક્ષતે ।
ગુર્વર્કલબ્ધોપનિષત્સુચક્ષુષા યે તે તરન્તીવ ભવાનૃતામ્બુધિમ્ ॥ ૨૪॥

આત્માનમેવાત્મતયાઽવિજાનતાં તેનૈવ જાતં નિખિલં પ્રપઞ્ચિતમ્ ।
જ્ઞાનેન ભૂયોઽપિ ચ તત્પ્રલીયતે રજ્જ્વામહેર્ભોગભવાભવૌ યથા ॥ ૨૫॥

અજ્ઞાનસંજ્ઞૌ ભવબન્ધમોક્ષૌ દ્વૌ નામ નાન્યૌ સ્ત ઋતજ્ઞભાવાત્ ।
અજસ્રચિત્યાઽઽત્મનિ કેવલે પરે વિચાર્યમાણે તરણાવિવાહની ॥ ૨૬॥

ત્વામાત્માનં પરં મત્વા પરમાત્માનમેવ ચ ।
આત્મા પુનર્બહિર્મૃગ્ય અહોઽજ્ઞજનતાઽજ્ઞતા ॥ ૨૭॥

અન્તર્ભવેઽનન્ત ભવન્તમેવ હ્યતત્ત્યજન્તો મૃગયન્તિ સન્તઃ ।
અસન્તમપ્યન્ત્યહિમન્તરેણ સન્તં ગુણં તં કિમુ યન્તિ સન્તઃ ॥ ૨૮॥

અથાપિ તે દેવ પદામ્બુજદ્વયપ્રસાદલેશાનુગૃહીત એવ હિ ।
જાનાતિ તત્ત્વં ભગવન્ મહિમ્નો ન ચાન્ય એકોઽપિ ચિરં વિચિન્વન્ ॥ ૨૯॥

તદસ્તુ મે નાથ સ ભૂરિભાગો ભવેઽત્ર વાન્યત્ર તુ વા તિરશ્ચામ્ ।
યેનાહમેકોઽપિ ભવજ્જનાનાં ભૂત્વા નિષેવે તવ પાદપલ્લવમ્ ॥ ૩૦॥

અહોઽતિધન્યા વ્રજગોરમણ્યઃ સ્તન્યામૃતં પીતમતીવ તે મુદા ।
યાસાં વિભો વત્સતરાત્મજાત્મના યત્તૃપ્તયેઽદ્યાપિ ન ચાલમધ્વરાઃ ॥ ૩૧॥

અહો ભાગ્યમહો ભાગ્યં નન્દગોપવ્રજૌકસામ્ ।
યન્મિત્રં પરમાનન્દં પૂર્ણં બ્રહ્મ સનાતનમ્ ॥ ૩૨॥

એષાં તુ ભાગ્યમહિમાઽચ્યુત તાવદાસ્તા-
મેકાદશૈવ હિ વયં બત ભૂરિભાગાઃ ।
એતદ્ધૃષીકચષકૈરસકૃત્પિબામઃ
શર્વાદયોઽઙ્ઘ્ર્યુદજમધ્વમૃતાસવં તે ॥ ૩૩॥

તદ્ભૂરિભાગ્યમિહ જન્મ કિમપ્યટવ્યાં
યદ્ગોકુલેઽપિ કતમાઙ્ઘ્રિરજોઽભિષેકમ્ ।

યજ્જીવિતં તુ નિખિલં ભગવાન્ મુકુન્દ-
સ્ત્વદ્યાપિ યત્પદરજઃ શ્રુતિમૃગ્યમેવ ॥ ૩૪॥

એષાં ઘોષનિવાસિનામુત ભવાન્ કિં દેવ રાતેતિ નઃ
ચેતો વિશ્વફલાત્ફલં ત્વદપરં કુત્રાપ્યયન્ મુહ્યતિ ।
સદ્વેષાદિવ પૂતનાઽપિ સકુલા ત્વામેવ દેવાપિતા
યદ્ધામાર્થસુહૃત્પ્રિયાત્મતનયપ્રાણાશયાસ્ત્વત્કૃતે ॥ ૩૫॥

તાવદ્રાગાદયઃ સ્તેનાસ્તાવત્કારાગૃહં ગૃહમ્ ।
તાવન્મોહોઽઙ્ઘ્રિનિગડો યાવત્કૃષ્ણ ન તે જનાઃ ॥ ૩૬॥

પ્રપઞ્ચં નિષ્પ્રપઞ્ચોઽપિ વિડમ્બયસિ ભૂતલે ।
પ્રપન્નજનતાનન્દસન્દોહં પ્રથિતું પ્રભો ॥ ૩૭॥

જાનન્ત એવ જાનન્તુ કિં બહૂક્ત્યા ન મે પ્રભો ।
મનસો વપુષો વાચો વૈભવં તવ ગોચરઃ ॥ ૩૮॥

અનુજાનીહિ માં કૃષ્ણ સર્વં ત્વં વેત્સિ સર્વદૃક્ ।
ત્વમેવ જગતાં નાથો જગદેતત્તવાર્પિતમ્ ॥ ૩૯॥

શ્રીકૃષ્ણ વૃષ્ણિકુલપુષ્કરજોષદાયિન્
ક્ષ્માનિર્જરદ્વિજપશૂદધિવૃદ્ધિકારિન્ ।
ઉદ્ધર્મશાર્વરહર ક્ષિતિરાક્ષસધ્રુગ્
આકલ્પમાર્કમર્હન્ ભગવન્ નમસ્તે ॥ ૪૦॥

ઇતિ બ્રહ્મકૃતા શ્રીકૃષ્ણસ્તુતિઃ સમાપ્તા ।

Proofread by PSA Easwaran

*Shri Krishnastutihbrahma*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*